Himachal Pradesh Model Paper

aglasem.com

TIME:- 3 HOURS
M.M. - 80

CLASS - 10+2
SUBJECT - SANSKRIT

परीक्षा निर्देश -

(i) इस प्रश्न-पत्र में चार खण्ड हैं।
(ii) सभी प्रश्न अनिवार्य हैं
(iii) प्रत्येक प्रश्न के अंक उसके सामने दिए गए हैं।

खण्ड - क (अपठितांश - अवबोधनम्)

प्र०1 अधोलिखितं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत -

संस्कृतभाषा देवभाषा प्रायेण सर्वासां भारतीयभाषाणां जननी प्रादेशिक-भाषाणां प्राणभूता इति। यथा प्राणी अन्नेन न जीवति परन्तु वायुं विना अन्नमपि जीवनं रक्षितुं न शक्नोति तथैव अस्मद्देशस्य कापि भाषा संस्कृतभाषावलम्बं विना जीवितुम् अक्षमेति निःसंशयम्। अस्यामेव अस्माकं धर्मः अस्माकमितिहासः अस्माकं भूतं भविष्यञ्च सर्वं सुसन्निहितम् अस्ति।

(अ) एकपदेन उत्तरत -
(क) प्रादेशिक-भाषाणां प्राणभूता का ?

(ब) पूर्णवाक्येन उत्तरत -
(क) अस्माकं संस्कृतभाषायां किं किं सुसन्निहितम् अस्ति ?
(ख) 'रक्षितुम्' इति पदे कः प्रत्ययः ?
(ग) 'अधर्मः' इत्यस्य अत्र किं विलोमपदं प्रयुक्तम् ?
(ङ) अस्य गद्यांशस्य शीर्षकं लिखत। (5)

प्र०2 अधोलिखितम् अनुच्छेदं पठित्वा तदाधारितानां प्रश्नानामुत्तराणि लिखत -

भगवान् श्रीकृष्णः अर्जुनमुपदिशति - यथा नरः जीर्णानि वासांसि विहाय अपराणि नवानि गृह्णाति तथा देही जीर्णानि शरीराणि विहाय अन्यानि नवानि संयाति। जातस्य मृत्युः ध्रुवः मृतस्य च जन्म ध्रुवम्। तस्मात् त्वम् अपरिहार्ये अर्थे शोचितुम् नार्हसि अथ चेत् त्वम् इमं धर्म-संग्रामं न करिष्यसि ततः स्वधर्मं कीर्तिं च हित्वा एवं पापमवाप्स्यसि। अन्यच्च

लोकाः ते अकीर्तिं कथयिष्यन्ति, अकीर्तिः च मरणात् अतिरिच्यते। हतो वा स्वर्गं प्राप्स्यसि जित्वा वा महीं भोक्ष्यसे तस्मात् हे कौन्तेय! त्वं युद्धाय कृतनिश्चयः उत्तिष्ठ।

(अ) एकपदेन उत्तरत-

(क) हतः कौन्तेयः कं प्राप्स्यति?

(ख) जित्वा कौन्तेयः काम् भोक्ष्यसे?

(ब) पूर्णवाक्येन उत्तरत-

(ग) देही केन प्रकारेण अन्यानि नवानि शरीराणि गृह्णाति?

(घ) 'विहाय' इति पदे कः उपसर्गः कश्च प्रत्ययः?

(ङ) 'जन्म' इति पदस्य किं विलोमपदं प्रयुक्तम्?

(च) 'स्वर्गं प्राप्स्यसि' अत्र क्रियापदं किम्?

(छ) 'जीर्णानि वासांसि' अत्र विशेषणपदं किम्?

(ज) अस्य अनुच्छेदस्य उचितं शीर्षकं लिखत। (8)

खण्ड- ख (रचनात्मकं कार्यम्)

प्र०3 प्रदत्त शब्दसूची साहाय्येन उचित पदानि चित्वा रिक्तस्थान पूर्तिं करणीया-

एकदा ____ एकः आहारार्थी ____ ग्रामं प्रविष्टः। तत्रत्याः ____ जम्बूकदर्शनेन जातरोषाः तं प्रत्यधावन्। सः जम्बूकः अपि प्राणरक्षणाय ____ प्रविष्टः। तत्र स्थापिते नीलीभाण्डे च ____। अनन्तरं नीलवर्णं मनोहरं स्वशरीरं ____ मुदितमनाः शनैः बहिः निष्क्रान्तः। विचित्रवर्णं तम् अपूर्वसत्वं ____ कुक्कुराः अपि ____ दूरं पलायिताः।

शब्दसूची

मन्यमानाः, जम्बुकः, रजकगृहं, विलोक्य, पतितः, कुक्कुराः, भयात् सायंकाले। (8)

प्र०4 अधोलिखितानि संकेतपदानि आधृत्य अनुच्छेदं लिखत-

षड्ऋतवः, ऋतुराजः, नशीतं, नउष्णं, प्रकृतेः, शोभा, कोकिलाः सरोवरेषु।

अथवा

अधोलिखित विषयोपरि अनुच्छेदं लिखत- (8)

"रामायणम्"।

खण्ड - ग (पठितांश - अवबोधनम्)

प्र०5 अधोलिखितं गद्यांशं पठित्वा तदाधारितानां प्रश्नानामुत्तराणि लिखत -

अपगतमले हि मनसि विशन्ति सुखेनोपदेशा गुणाः। हरति अतिमलिन्नमपि दोषजातं गुरूपदेशः। गुरूपदेशश्च नाम अखिलमलप्रक्षालनक्षमम् अजलं स्नानं विशेषेण तु राज्ञां विरला हि तेषामुपदेष्टारः।

प्रश्नाः - (अ) एकपदेन उत्तरत -

(क) दोषजातं कः हरति ?

(ब) पूर्णवाक्येन उत्तरत -

(ख) केषाम् उपदेष्टारः विरलाः भवन्ति ?

(ग) 'अजलम् स्नानम्' इति पदे किं विशेष्यम् ? (4)

(घ) 'दुःखेन' इत्यस्य किं विलोमपदं प्रयुक्तम् ? (अथवा)

(ङ) 'दोषजातं हरति' अनयोः पदयोः क्रियापदं किम् ?

प्र०6 अधोलिखितं पद्यांशं पठित्वा तदाधारितानां प्रश्नानामुत्तराणि लिखत -

सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।
वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः॥

प्रश्नाः (अ) एकपदेन उत्तरत -

(क) मानवः क्रियां कदा न विदधीत ?

(ब) पूर्णवाक्येन उत्तरत -

(ख) गुणलुब्धाः सम्पदः किं कुर्वन्ति ?

(ग) 'विवेकः' इत्यस्य अत्र किं विलोमपदं प्रयुक्तम् ? (4)

(घ) 'गुणलुब्धाः सम्पदः' अत्र विशेष्यं किम् ? (अथवा)

(ङ) 'कुर्वीत' इति पदस्य अत्र कः पर्यायः प्रयुक्तः ?

प्र०7 अधोलिखितं नाट्यांशं पठित्वा तदाधारितानां प्रश्नानामुत्तराणि लिखत -

अरुन्धती - एहि वत्से ! (लवमुत्सङ्गे गृहीत्वा आत्मगतम्) दिष्ट्या च केवलमुत्सङ्गादिरात्मनोरथोऽपि मे मूर्तिः।

कौशल्या - इतोऽपि तावदेहि। (उत्सङ्गे गृहीत्वा) अहो न केवलं मांसलोज्ज्वलेन देहबन्धनेन, कलहंसघोषघर्घरानुनादिना स्वरेण च राममद्रमनुसरति।

प्रश्नाः (अ) एकपदेन उत्तरत

(क) कः उत्सङ्गे उपविशति ?

(ब) पूर्णवाक्येन उत्तरत-

(ख) बालकस्य देहबन्धः कीदृशः ?

(ग) लवः कम् अनुसरति ?

(घ) "शिरसा" इति पदे का विभक्तिः ? (अथवा) (4)

(ङ) 'प्रविश्य' इति पदे कः उपसर्गः कश्च प्रत्ययः

प्र०8 (क) महाकवि 'कालिदासस्य' अथवा कवि 'अम्बिकादत्तस्योपरि' हिन्दीभाषायां संक्षिप्त परिचयं लिखत।

(ख) 'बालकौतुकम्' अथवा 'विक्रमस्यौदार्यम्' पाठस्य सारं संक्षेपेण हिन्दीभाषायां लिखत। (2½+2½ = 5)

प्र०9 कयोः द्वयोः भावार्थं स्पष्टीकुरुत-

(क) कोटीश्चतस्रो दश चाहर।

(ख) क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्।

(ग) उपभोक्तृणामपि अभियोगो नास्ति विभागस्य विषये। (2½+2½=5)

प्र०10 वस्तुनिष्ठ प्रश्न :- निम्नलिखित प्रत्येक प्रश्न 1 अंक का है, उसके चार विकल्प दिए जा रहे हैं, जिनमें से केवल एक सही है, इनमें से सही विकल्प लिखिए :-

(i) विद्यया किम् अश्नुते ?

(क) अमृतम् (ख) मृत्युं (ग) परमात्मा (घ) आत्मा

(ii) अकर्मणः किं ज्यायः ?

(क) अकर्म (ख) धनम् (ग) कर्म (घ) कार्यम्

(iii) चन्द्रापीडं कः उपदिशति ?

(क) शूद्रकः (ख) वैशम्पायनः (ग) तारापीडः (घ) शुकनासः

(iv) समुद्राः कति सन्ति ?

(क) षड् (ख) सप्त (ग) अष्ट (घ) नव

(v) सर्वत्र कीदृशं नीरम् आस्ति ?

(क) मरालराजितम् (ख) मीनराजितम् (ग) नीरजराजितम् (घ) पुष्पराजितम्

(vi) उद्भिज्ज-परिषदः सभापतिः कः आसीत् ?

(क) मानवः (ख) अश्वत्थः (ग) वनस्पतिः (घ) लेखकः

(vii) शिल्पिभिः मनोहरः मण्डपः कारितः। (प्रश्ननिर्माणं कुरुत)

(क) कैः (ख) कस्य (ग) कस्मिन् (घ) केन

(viii) सत्कविः शब्दार्थौ द्वौ अपेक्षते। (प्रश्ननिर्माणं कुरुत)
(क) कस्य (ख) किम् (ग) कम् (घ) कौ।

(ix) अश्व रोहितानां मध्ये चरतु। (प्रश्ननिर्माणं कुरुत)
(क) कान् (ख) किम् (ग) केषाम् (घ) कस्मिन्।

(x) कौत्सः वरतन्तोः शिष्यः आसीत् (प्रश्ननिर्माणं कुरुत)
(क) कस्मै (ख) केषु (ग) कः (घ) कम्।

(xi) 'मृण्मये' शब्दस्य कः अर्थः?
(क) लोहे के बने हुए (ख) चांदी के बने हुए
(ग) तांबे के बने हुए (घ) मिट्टी के बने हुए।

(xii) 'औदार्यम्' शब्दस्य कः अर्थः?
(क) मधुरता (ख) उदारता (ग) कठोरता (घ) सरलता।

(xiii) यद्यपि नीरराजितं ____ सर्वत्र अस्ति, ____ मानसं ____ विना न रमते। (सही विकल्प चुनिए)
(क) मरालस्य, मानसं, नीरं (ख) नीरं, मरालस्य, मानसं
(ग) मानसं, मरालस्य, नीरं (घ) मरालस्य, मानसं, मानसं। (13×1=13)

खण्ड घ (छन्दोऽलंकार परिचयः)

प्र०11 कयोः द्वयोः छन्दसोः लक्षणम्, उदाहरणं, संगतिसहितं लिखत-
अनुष्टुप्, वसन्ततिलका, मालिनी। (3+3=6)

प्र०12 कयोः द्वयोः अलंकारयोः परिभाषाम्, उदाहरणं संगतिसहितं लिखत-
यमकः, उत्प्रेक्षा, श्लेषः। (3+3=6)

प्र०13 बहुविकल्पीय प्रश्नाः-
(i) कस्मिन् गणे सर्वे वर्णाः गुरवः भवन्ति?
(क) सगणे (ख) नगणे (ग) मगणे (घ) तगणे

(ii) 'वसन्तः' इति पदे कः गणः?
(क) यगणः (ख) भगणः (ग) रगणः (घ) जगणः

(iii) ____ उपमा भेदे। (रिक्तस्थानं पूरयत)
(क) अनुप्रासः (ख) साधर्म्यम् (ग) रूपकम् (घ) अर्थान्तरन्यासः।

(iv) ____ अनुप्रासः। (रिक्तस्थानं पूरयत)
(क) उपमा (ख) वैषम्येऽपि (ग) वर्णसाम्यम् (घ) स्वरस्य। (4×1=4)